# श्रीमद् भागवत रसिक कुटुंब

## दुर्गनाशनस्तोत्र (श्रीकृष्ण कृत)

**श्रीकृष्ण उवाच**

**त्वमेव सर्वजननी, मूलप्रकृतिरीश्वरी ।**
**त्वमेवाद्या सृष्टिविधौ, स्वेच्छया त्रिगुणात्मिका ॥1॥**

**कार्यार्थे सगुणा त्वं(ञ्) च, वस्तुतो निर्गुणा स्वयम् ।**
**परब्रह्मस्वरूपा त्वं(म्), सत्या नित्या सनातनी ॥2॥**

**तेजः(स्)स्वरूपा परमा, भक्तानुग्रहविग्रहा ।**
**सर्वस्वरूपा सर्वेशा, सर्वाधारा परात्परा॥3॥**

**सर्वबीजस्वरूपा च, सर्वपूज्या निराश्रया ।**
**सर्वज्ञा सर्वतोभद्रा, सर्वमं(ङ्)गलमं(ङ्)गला ॥4॥**

**सर्वबुद्धिस्वरूपा च, सर्वशक्तिस्वरूपिणी।**
**सर्वज्ञानप्रदा देवी, सर्वज्ञा सर्वभाविनी ॥5॥**

त्वं(म्) स्वाहा देवदाने च, पितृदाने स्वधा स्वयम् ।
दक्षिणा सर्वदाने च, सर्वशक्तिस्वरूपिणी ॥6॥

निद्रा त्वं(ञ्) च दया त्वं(ञ्) च, तृष्णा त्वं(ञ्) चात्मनः(फ्) प्रिया ।
क्षुत्क्षान्तिः(श्) शान्तिरीशा च, कान्तिः(स्) सृष्टिश्च शाश्वती ॥7॥

श्रद्धा पुष्टिश्च तन्द्रा च, लज्जा शोभा दया तथा।
सतां(म्) सम्पत्स्वरूपा च, विपत्तिरसतामिह ॥8॥

प्रीतिरूपा पुण्यवतां(म्), पापिनां(ङ्) कलहाङ्कुरा ।
शश्वत्कर्ममयी शक्तिः(स्), सर्वदा सर्वजीविनाम् ॥9॥

देवेभ्यः(स्) स्वपदोदात्री, धातुर्धात्री कृपामयी ।
हिताय सर्वदेवानां(म्), सर्वासुरविनाशिनी ॥10॥

योगनिद्रा योगरूपा, योगदात्री च योगिनाम् ।
सिद्धिस्वरूपा सिद्धानां(म्), सिद्धिदा सिद्धयोगिनी ॥11॥

ब्रह्माणी माहेश्वरी च, विष्णुमाया च वैष्णवी ।
भद्रदा भद्रकाली च, सर्वलोकभयङ्करी ॥12॥

ग्रामे ग्रामे ग्रामदेवी, गृहदेवी गृहे गृहे ।
सतां(ङ्) कीर्तिः(फ्) प्रतिष्ठा च,  निन्दा त्वमसतां(म्) सदा ॥13॥

महायुद्धे महामारी, दुष्टसं(म्)हाररूपिणी ।
रक्षास्वरूपा शिष्टानां(म्), मातेव हितकारिणी ॥14॥

वन्द्या पूज्या स्तुता त्वं(ञ्) च, ब्रह्मादीनां(ञ्) च सर्वदा ।
ब्राह्मण्यरूपा विप्राणां(न्), तपस्या च तपस्विनाम् ॥15॥
विद्या विद्यावतां(न्) त्वं(ञ्) च, बुद्धिर्बुद्धिमतां(म्) सताम् ।
मेधास्मृतिस्वरूपा च, प्रतिभा प्रतिभावताम् ॥16॥

राज्ञां प्रतापरूपा च, विशां(वँ) वाणिज्यरूपिणी ।
सृष्टौ सृष्टिस्वरूपा त्वं(म्), रक्षारूपा च पालने ॥17॥

तथान्ते त्वं(म्) महामारी, विश्वस्य विश्वपूजिते ।
कालरात्रिर्महारात्रिर्- मोहरात्रिश्च मोहिनी ॥18॥

दुरत्यया मे माया त्वं(यँ), यया सम्मोहितं(ञ्) जगत्।
यया मुग्धो हि विद्वां(म्)श्च, मोक्षमार्गं(न्) न पश्यति॥19॥

इत्यात्मना कृतं(म्) स्तोत्रं(न्), दुर्गाया दुर्गनाशनम् ।
पूजाकाले पठेद्यो हि, सिद्धिर्भवति वाञ्छिता ॥20॥

इति श्रीब्रह्मवैवर्तपुराणे प्रकृतिखंडे श्रीकृष्णकृतं(न्) दुर्गास्तोत्रम् संपूर्णम्।।